शास्त्री-I साहित्य

अभिज्ञानशाकुन्तलम्

Date ___/___/______

प्र० (1) - अभिज्ञानशाकुन्तलं रूपकस्य कः भेदः?

उत्तरम् - अभिज्ञानशाकुन्तलं रूपकस्य नाटकभेदः।

प्र० (2) - अभिज्ञानशाकुन्तले कति अङ्काः सन्ति?

उत्तरम् - अभिज्ञानशाकुन्तले सप्त अङ्काः सन्ति।

प्र० (3) - स्रष्टुः आद्या सृष्टिः का?

उत्तरम् - स्रष्टुः आद्या सृष्टिः जलरूपा।

प्र० (4) - विधिहुतं हविः कः वहति?

उत्तरम् - विधिहुतं हविः पावकः वहति।

प्र० (5) - कया प्राणिनः प्राणवन्तः?

उत्तरम् - वायुरूपया भगवतः मूर्त्या प्राणिनः प्राणवन्तः भवन्ति।

प्र० (6) - का सर्वबीजप्रकृतिराहुः?

उत्तरम् - पृथ्वीरूपा भगवतः तनुः सर्वबीजप्रकृतिराहुः।

प्र० (7) - अभिज्ञानशाकुन्तलस्य प्रथमे श्लोके किं छन्दः?

उत्तरम् - अभिज्ञानशाकुन्तलस्य प्रथमे श्लोके स्रग्धरा-छन्दः विज्ञेयम्।

प्र० (8) कस्य दिवसाः परिणामरमणीयाः?

उत्तरम् - ग्रीष्मसमयस्य दिवसा परिणामरमणीयाः।

Renu Devi

06/11/20

राधा उमाकान्त सं० महावि० सुरखसेना, पूर्णिया।

Page No.

उपशास्त्री-I साहित्य - तृतीय - पत्रम
किरातार्जुनीय महाकाव्यम
प्रथमः सर्गः

Saathi

Date ___/___/___

प्र०(1) - पद्यमिदम् व्याख्येयम् ।

पुरोपनीतं नृप! रामणीयकं द्विजातिशेषेण यदेतदन्धसा ।
तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः ॥

उत्तरम्:- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति हे राजन! पूर्वं ब्राह्मणान् सादरं भोजयित्वा तदवशिष्टमन्नं भुक्तवतस्तव यत् शरीरं मनोहरमासीत् साम्प्रतं वन्यानि फलान्यश्नतस्ते तदेव शरीरं यथा क्षीणतामुपैति तथैव ते कीर्तिरपि क्षीयते ।

व्याख्या:- नृप = हे राजन! यत् एतत् = जो यह । (ते वपुः = तुम्हारा शरीर) पुरा = पहिले । द्विजातिशेषेण = ब्राह्मणों के खा लेनेपर बचे हुए (उच्छिष्ट) । अन्धसा = अन्न से । रामणीयकं = मनोहरता को । उपनीतम् = प्राप्त होता था । अद्य = आज । वन्यफलाशिनः = जंगल के कन्द मूल - फलों का आहार करनेवाले । ते = तुम्हारा । तद्वपुः = वही शरीर । यशसा समं = कीर्ति के साथ । कार्श्यम् = कृशता को परैति = प्राप्त हो रहा है

Renu Devi,
06/11/20
राज्य उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

Page No.

शास्त्री-II साहित्य

रघुवंश महाकाव्यम् - त्रयोदश-चतुर्दश सर्गौ

Date __ / __ / __ लघूत्तरीय प्रश्नोत्तराणि

प्र० (1) - केन प्रकारेण पुष्पकविमानस्य स्वमनोऽनुगामित्वं वर्णयामास श्रीरामः ?

उत्तरम् - श्रीरामः सीतामाह -

क्वचित्पथा सञ्चरते सुराणां क्वचिद्घनानां पततां क्वचिच्च ।
यथाविधो मे मनसोऽभिलाषः प्रवर्तते पश्य तथा विमानम् ॥

प्र० (2) - केन श्लोकेन श्रीरामः पुष्पक विमानस्य देवमार्गगामित्वं वर्णयामास ?

उत्तरम् - असौ महेन्द्र द्विपदानगन्धिः त्रिमार्गगावीचिविमर्दशीतः ।
आकाशवायुर्दिनयौवनोत्थान् आचामति स्वेदलवान् मुखे ते ।

प्र० (3) - केन प्रकारेण लताः राम सीताऽपनयनमार्गं रामं सं सूचयामास ?

उत्तरम् - आवर्जित पल्लवाभिः शाखाभिः ।

प्र० (4) - मृग्यः केन प्रकारेण सीताऽपहरणमार्गं श्रीरामं सूचयामास ?

उत्तरम् - उत्पक्ष्मराजीनि विलोचनानि दक्षिणस्याम् व्यापारयित्वा ।

प्र० (5) - माल्यवति पर्वते मेघगर्जनानि श्रुत्वा सीता विहीनो रामः केन प्रकारेण दिनानि अतिवाहितवान् ?

उत्तरम् - अतीव कष्टेन ।

Renu Devi
06/11/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

उपशास्त्री - II    साहित्य - तृतीय - पत्रम्

किरातार्जुनीय महाकाव्यम्

प्रथमः सर्गः

Date ___/___/___

प्र० (1) - पद्य मिदम् व्याख्येयम् ।

अनारतं यौ मणि पीठशायिनावरंजयद्राजशिरः स्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषाम् ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति - निरन्तरं मणिमयपीठेषु विराजमानौ यौ भवच्चरणौ प्रणमतां राज्ञां मौलिस्थमालातः प्रपतता परागेण निरन्तरमरज्येताम् तावेव संप्रति मृगैस्तपस्विभिश्च छिन्नशिरःसु कुशकण्टकेषु तिष्ठतः । इयं ते दुर्दशा जातेत्यर्थः ।

व्याख्या - अनारतं = निरन्तर । मणिपीठशायिनौ = रत्नजटित चौकीपर रहने वाले । यौ = जिन (तुम्हारे चरणों) को । राजशिर स्रजां रजः = राजाओं के मस्तकपर की मालाओं का पराग । अरञ्जयत् = रंग देता था । तौ ते चरणौ = वे ही तुम्हारे चरण, मृगद्विजालूनशिखेषु = मृगों और ऋषियों द्वारा खूँटी गई शिखाओं वाले । बर्हिषां वनेषु = कुशाओं के वनों में । निषीदतः = रहते हैं ।

Renu Devi

06/11/20

राधा उमाकांत सं० महावि० सुखसेना, पूर्णिया